रथ्याकर्द्दमतोयानि स्पृष्टान्यन्त्यैश्च वायसैः। मारुतार्केण शुध्यन्ति पक्वेष्टकचितानि च। तथैभिश्च विशुध्यन्ति सूर्य्यसोमांशुमारुतैः" विष्णुः। अथ मृत्तिकाशुद्धिः "वल्मीकादुत्कराल्लेपाज्जलाध्वपथिवृक्षयोः। कृतशौचावशिष्टाश्च न ग्राह्याः सप्त मृत्तिकाः। शुचिदेशे च संग्राह्याः शर्कराश्मादिवर्ज्जिताः" शाता०। अथ पक्वान्नादिशुद्धशुद्धप्रायाः। "केशकीटच्युतघ्रातं वायसोपहतञ्च यत्। क्लीवाभिशस्तपतितैः सूतिकोदक्यनास्तिकैः। दृष्टं वा स्यादन्नं तु तस्य निष्कृतिरुच्यते। अभ्युक्ष्य किञ्चिदुद्धृत्य तद्भुञ्जीत विशङ्कितः। भस्मना वापि संस्पृश्य संस्पृश्य वोल्मुखेन च। सुवर्णरजताभ्यां च भोज्यं प्रातमजेन वा"। घृतं सपायसं क्षीरं तथैवेक्षुरसो गुडः। शूद्रभाण्डस्थितं तक्रं तथा मधु न दुष्यति" शाता०। "त्वक्केशकीटरोमनखास्थिपुरीषाणि दृष्ट्वा तद्देशपिण्डानुद्धृत्याद्भिरभ्युक्ष्य भस्मनावकीर्य्याभिवाच्य पुनरपि प्रोक्ष्य वाचा प्रशस्तम् ओं भूर्भुवः स्वरित्युपरि परिशोध्य च पुनरेवोपयुञ्जीत" बौधा०। "मसूरमाषसंयुक्तं तथा पर्य्युषितं च यत्। तत्तु प्रक्षालितं कृत्वा भुञ्जीत ह्यभिघारितम्" यमः "माषा राजमाषाः" हेमा०। पर्य्युषितभोजनविधानमापद्विषयम् "शुक्तानि हि द्विजोऽन्नानि न भुञ्जीत कदाचन। क्षालयित्वा तु निर्दोषाण्यापद्धर्म्मगतो यदा" तस्यैव वचनान्तरात् "मक्षिकाकेशमन्नेषु पतितं यदि दृश्यते। मूषिकस्य पुरीषं वा क्षुतं यच्चावधूनितम्। भस्मनास्पृश्य वाश्नीयादभ्युक्ष्य सलिलेन वा" यमः। क्षुतेनाक्रान्तमवक्षुतम् अवधूनितं वस्त्रेण। "अवक्षुतं काकपतङ्गकीटैरुदक्यया वा पतितैश्च दृष्टम्। अलातभस्माम्बुहिरण्यकाशैः संस्पृष्टमन्नं मनुराह भोज्यम्" यमः। अस्यापवादः "मक्षिका मशका दंशा घुणा सूक्ष्मपिपीलिका। आमिषामेध्यसेवी च नैते कीटा निसर्गतः।" यमः "पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतम्। दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुध्यति" मनुः। गोघ्रातेऽन्ने तथा केशमक्षिकाकीटदूषिते। सलिलं भस्म मृद्वारि प्रक्षेप्तव्यं विशुद्धये। अत्र मक्षिका विष्ठामक्षिका 'केशकीटच्युतनिष्ठीवित' वचोऽभिहतं श्वभिराघ्रातं प्रेक्षितं यच्च पर्य्युषितम् पुनः सिद्धं चण्डालेनावेक्षितमभोज्यमन्नमन्यत्र हिरण्योदकस्पर्शात्" सुमन्तुः "आकरजानां त्वभ्यवहरणीयानां घृतेनाभिघारितानां शुद्धिः पुनःपचनमेव स्नेहानां, स्नेहवद्रसानां, संहतानामद्भिः प्रोक्षणमतिद्रवाणामुत्पवनम्, शुष्काणामुद्धृतदोषाणां संस्कारः परिप्लावितानां, दोषाणां ततस्त्यागः" शङ्खलि०। "परोक्षमन्नं संस्कृत्य अग्नावधिश्रित्याद्भिः प्रोक्षेत्तदन्नं पवित्रम्" आप०। "अनिष्टगन्धोपघ्राणश्रवणदर्शने केशकीटपिपीलिकाभिरन्नाद्योपघाते काञ्चनरजतवैदूर्य्यप्रबालगोबालाजिनदर्भाणामेकतमेनाद्भिः संसृष्टेन मन्त्रप्रोक्षणं पर्य्यग्निकरणमादित्यदर्शनात् पूतं भवति वह्वन्नोपघाते ब्राह्मणमत्या तदन्तरमपनीय अजमवघ्राप्य पूतं भवति त्यागो रसमयानाम्" हारी०। सिद्धहविषां महतां श्ववायसप्रभृत्युपहतानां तद्देशपिण्डमुद्धृत्य "पवमानः सुवर्ज्जन" इत्यनुवाकेनाभ्युक्षणं मधूदके पयोविकारे च पात्रान्तरनयने शुद्धिः एवं तैलसर्पिषी, उच्छिष्टसमन्वारब्धे तूदकेऽवधायोपयोजयेत्" बौधा०। उच्छिष्टसमन्वारब्धे उच्छिष्टसंस्पृष्टे" हेमा०। पयोदधिविकारादि शुचि पात्रान्तरे स्थितम्। पावनोत्पवनाभ्यां च पर्य्यग्निकरणेन च" लौगा० "पवनं वस्त्रादिना गालनम् उत्पवनं दर्भपवित्रेण "सवितुष्ट्वा प्रसव उत्पुनामि" इत्यनेन मन्त्रेण संस्करणम्। "आममांसं घृतं क्षौद्रं स्नेहाश्च फलसम्भवाः। म्लेच्छभाण्डस्थिता दुष्टा निष्क्रान्ताः शुचयः स्मृताः" यमः "अपणं घृततैलानां प्लावनं गोरसस्य च। भाण्डानि प्लावयेदद्भिः शाकमूलफलानि च। सिद्धमन्नं तथा सर्पिः क्षीरञ्च दधि चाम्बु च। एतेषामवलीढानां तैजसी शुद्धिरिष्यते काकमार्जारनकुलसर्पमूषिकपक्षिभिः। संस्कृतं तु यदाहार्य्यमवलिह्येत केनचित्। सुवर्णवर्णताम्रोष्णं गोबालै रजतेन वा। स्पृष्टमेकतमेनापि भोज्यं प्रातमजेन वा" शङ्ख०। तैजसी शुद्धिः पर्य्यग्निकरणम्। इयं शुद्धिः केशादिकं दूषकमुद्धृत्य कार्य्या" हेमा०। "घृतदधिपयस्तक्राणामाकरस्थितानामदोषः" ऋः "आधारदोषे तु नयेत् पात्रात् पात्रान्तरं द्रवम्। घृतं तु पायसं क्षीरं तथैवेक्षुरसं गुडम्" द्रवद्रव्याणि भूरीणि परिप्लाव्यानि वाम्भसा। शस्यानि व्रीहयश्चैव शाकमूलफलानि च। त्यक्त्वा तु दूषितं भागमाप्लाव्याथ जलेन च। ब्रह्मा० पु०। "द्रोणादभ्यधिकं सिद्धमन्नमुपहतं न दुष्यति। तस्योपहतमात्रमपास्य गायत्र्याभिमन्त्रितं सुवर्णाम्भः क्षिपेत् वस्तस्य च दर्शयेदग्नेः"। विष्णुः। "भूतं द्रोणाधिकं चान्नं श्वकाकैरुपघातितम्। न त्याज्यं तस्य शुद्ध्यर्थं ब्राह्मणेभ्यो निवेदयेत्। कर्त्तव्यं वचनं तेषामन्नसंस्कारकर्म्मणि" "द्रोणाधिकस्य शुद्धिस्तु धर्म्मशास्त्रेषु पठ्यते। श्वकाकैरवलीढं तु द्रोणान्नं न विसर्ज्जयेत्। ग्रासमुद्धृत्य तन्मात्रं यच्च लालाङ्कितं भवेत्। सुवर्णोदकेनाभ्युक्ष्य